संस्कृतवार्ता:

08.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रशासनेन अद्य वक्फ संशोधनविधेयकं निरीक्षणार्थं संयुक्तसंसदीय-समितिं प्रति प्रेषितम्

· विनियोगविधेयक-जम्मूकश्मीर-विनियोगविधेयक- वित्त-विधेयकानि राज्यसभायां चर्चारतानि सन्ति।

· बाङ्ग्लादेशे नोबेलपुरस्कारविजेतु: प्रोफेसर-मुहम्मदयूनुसस्य नेतृत्वे अल्पावधिकरूपेण नियोजितं प्रशासनम् अद्य रात्रौ शपथवचनं स्वीकरिष्यति।

· पेरिस् ओलम्पिक इति क्रीडाकुम्भे भारतीयः मल्लयोद्धा अमनसेहरावतः सप्तपंचाशत् किलोग्रामवर्गस्य फ्रीस्टाइल् इति उपान्त्यचक्रीय क्रीडायां प्रवेशं कृतवान्।

<u>लोकसभा वक्फ विधेयक:</u>

चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य वक्फ संशोधनविधेयकं निरीक्षणार्थं संयुक्तसंसदीयसमितिं प्रति प्रेषितम्। अद्य लोकसभायाम् अस्य विधेयकस्य प्रस्तुतेरनन्तरं अल्पसङ्ख्यककार्यमन्त्री किरेन रिजिजुः उक्तवान् यत् प्रशासनं विधिगत-निरीक्षणार्थं तत्परमस्ति। असौ अग्रे उक्तवान् यत् केन्द्रप्रशासनस्य विचार: स्पष्टम् अस्ति । श्री रिजिजु: पञ्चनवत्युत्तरैकोनविंशतितमवर्षीयं वक्फ् अधिनियम इत्यस्य संशोधनार्थं निम्नसदनस्य पुरःस्थापितवान् । विधेयकं राज्य-वक्फ्-बोर्ड् इत्येतेषां अधिकारैः कार्यैः च सह सम्बद्धान् विषयान् अवलम्ब्य अस्ति। मन्त्रिणा स्पष्टीकृतं यत् अस्य विधेयकस्य उद्देश्यं धार्मिक-निकायस्य कार्याचरणे हस्तक्षेपकरणं नास्ति । अपि च इदं विधेयकं मुस्लिम समुदायस्य वंचित-निर्धन वर्गेभ्य: न्यायं प्रदास्यति। अयं प्रसङ्ग: संविधानस्य समवर्तिसूच्या: अन्तर्गतं निहितं वर्तते। केन्द्र प्रशासनस्य च पार्श्वे एतदर्थं पर्याप्तक्षमतापि विद्यते।

राज्यसभा-वित्तमन्त्री

केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा राज्यसभायां विनियोगविधेयक-जम्मूकश्मीर-विनियोगविधेयक- वित्त-विधेयकानि च प्रस्तुतवती। एतानि विधेयकानि ह्य: लोकसभायां पारितानि । सम्प्रति राज्यसभायां चर्चारतानि सन्ति।

बाङ्ग्लादेश – प्रशासनम्

बाङ्ग्लादेशे नोबेलपुरस्कारविजेतु: प्रोफेसर मुहम्मदयूनुसस्य नेतृत्वे अल्पावधिकरूपेण नियोजितं प्रशासनम् अद्य रात्रौ शपथवचनं स्वीकरिष्यति। अनेन सहैव सेनाप्रमुख: जनरल-वकार-उज-जमां इत्येष: सूचितवान् यत् प्रायश: पञ्चदशजना: अपि अस्य अल्पावधिक- प्रशासनस्य परामर्शाय शपथवचनं स्वीकर्तुं शक्नुवन्ति। असौ, देशे त्रिषु चतुर्षु दिवसेषु स्थिति: सामान्या भविष्यति इति सम्भावनां प्रकटितवान्। अत्रान्तरे सेनया देशवासिन: निवेदिता: यत् केषाञ्चित् जनानां पार्श्वे यदि हिंसा-वध-पारस्परिक संघर्षाणां सञ्चेतना आगमिष्यति तदा पीडितजनै: निकटस्थे सैन्यशिविरे सम्पर्क: साधितव्य: इति।

प्रधानमन्त्रिणः - वायनाड्नगरं

प्रधानमन्त्रिणः नरेन्द्रमोदिनः शनिवासरे भूस्खलनेन व्याकुलितं वायनाड्नगरं प्रति भ्रमणं निर्धारितमस्ति। प्रधानमन्त्रिणः कन्नूर-वायनाड-नगरयोः भ्रमणार्थं सर्वाः व्यवस्थाः क्रियन्ते। यात्रायाः पूर्वम् अद्य कन्नूर्-वायनाड्-नगरयोः सुरक्षासमितय: अपि आयोजिताः। प्रधानमन्त्री वायनाड्-नगरस्य भूस्खलनेन प्रभावितस्य क्षेत्रस्य उदग्रविमानेन सर्वेक्षणं करिष्यति इति सम्भावना अस्ति। अत्रान्तरे, केरल-कर्नाटकयोः सेनाविभागेभ्यः आहूताः प्रायः पञ्चशतं सैनिकाः वायनाड्-नगरात् प्रत्यागन्तुं निश्चितवन्तः। नवनिर्मितं बैली-सेतुं सुदृढीकर्तुं दलमेकम् , उदग्र-विमानान्वेषण-दलम् च इतोऽपि कतिपयानि दिनानि यावत् वायनाड्-नगरे एव स्थास्यन्ति। अद्य अपराह्णे मण्डल-समाहर्ता-कार्यालये सशस्त्र-सेनाबलं स्नेहपूर्वकं गमनानुमतिं प्राप्तवत्। राज्य-मन्त्रिणौ पी. ए. मोहम्मद् रियास: , ए. के. ससीन्द्रन् च उपस्थितौ आस्ताम् । विगत-नवदिनानि यावत् प्रचलितस्य अन्वेषणस्य उद्धारकार्यस्य च कृते स्थानीयजनैः दत्तसमर्थनाय सेना-कर्मचारिणः कृतज्ञतां प्रकटितवन्तः।

राष्ट्रपति:-न्यूजीलैण्डयात्रा

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य स्वीय-न्यूजीलैण्ड-देशस्य यात्रावधौ वेलिंग्टनस्थिते प्रशासकीयसदने प्रधानमन्त्रिणा क्रिस्टोरलक्सन इत्यनेन उपप्रधानमन्त्रिणा विदेशमन्त्रिणा च विंस्टन-पीटर्स इत्यनेन साकं द्विपक्षीयवार्तां विहितवती । अत्रावधौ सीमाशुल्क सहयोग-परम्परागतचिकित्सा-नवीकरणीयोर्जा-प्रसङ्गेषु चर्चा समनुष्ठिता। अस्माकं वार्ताहरेण विज्ञापितं यत् उभौ नेतारौ साकारात्मकस्तरे इमां द्विपक्षीयवार्तां साधितवन्तौ। उभयो: देशयोर्मध्ये व्यापार-सहभागित्वमपि सरलं भविष्यति। अपरत्र न्यूजीलैण्डदेशेन एतस्मिन् व्यापारक्षेत्रे संयुक्तानुसन्धान-विकासयो: अवसराणां संवर्धनाय मार्गा: प्रशस्तिकृता: अपि च अन्ताराष्ट्रिय-सौर संयुते: अनुमोदनं विहितम् ।

विनेश-सन्यास:

विनेशफोगाटइत्येषा पेरिसोलम्पिक्रीडाया: मल्लयुद्धस्य निर्णायकद्वन्द्वे शरीरस्य अतिभारस्य कारणेन ह्य: अयोग्या घोषिता जाता। तदनु एषा मल्लयुद्ध-क्रीडिका क्रीडाया: सन्यासस्य घोषणां कृतवती। अनया इमा सूचना एक्सइत्याख्ये अन्तर्जालपटले समुद्घोषिता ।

रक्षामन्त्री-मनुभाकर:

रक्षामन्त्री राजनाथसिंह: अद्य पेरिसोलम्पिक-क्रीडायां पदकद्वयविजेत्र्या मनुभाकर इत्यनया साकं मेलनं कृतवान् । सामाजिकसञ्चारपटले श्रीसिंह: अवोचत् यत् मनुभाकर: पेरिसोलम्पिक-क्रीडायां राष्ट्राय द्वे कांस्यपदके विजित्य ऐतिह्यं विरचितवती। तस्या: अद्वितीयोत्कृष्ट-प्रदर्शनेन प्रत्येकं भारतीया: उत्साहिन: सन्ति ।

सकलगृहोत्पाद:-भारतीयरिजर्व बैंक

चतुर्विंशत्यधिक-द्विसहस्र-पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षयो: वित्तीयवर्षाय स्वकीयाया: तृतीयाया: द्वैमासिकसमित्या: उपवेशने भारतीय रिजर्व बैंक इत्यनेन प्रवर्तमान-वित्तवर्षाय सकल-गृह-उत्पादस्य वृद्धिमूल्यस्य पूर्वानुमानं सप्तदशमलव-द्वि-प्रतिशतं इति यथावदेव स्थापितम् । भारतीय रिजर्व बैंक इत्येतस्य प्रमुख: शक्तिकान्तदास: सूचितवान् यत् मौद्रिकनीतिसमिति: षड्सदस्येषु चतुर्णां सदस्यानां बहुमतेन निक्षेपमूल्यं षड्दशमलवपञ्चप्रतिशतमेव अपरिवर्त्य निर्णयं निर्णीतवती । भारतीयरिजर्व बैंक इत्याख्येन नैरन्तर्येण नवमं वारं अपि नीतिगतमूल्यं यथावदेव स्थापनस्य निर्णय: गृहीत: ।

सांसद-सम्मान-समारोहः

अद्य श्रावणशुक्ल-चतुर्थ्यां संस्कृतभाषायां शपथग्रहणं कृतवतां सांसदानां सम्मान-समारोहः मुख्यसमितिकक्षः, ,नवदेहली इत्यत्र संस्कृत भारती पक्षतः आचर्यते। अष्टादश्यां लोकसभायां द्वाविंशतिः अथ च वर्तमानराज्यसभायां त्रयः माननीयाः सांसदाः संस्कृतभाषया शपथं विधाय आत्मनः संस्कृतानुरागं शास्त्रसंरक्षण- सङ्कल्पञ्च प्रकटितवन्तः सन्ति। तादृशाः आहत्य पञ्चविंशतिसांसदाः सन्ति। कार्यक्रमे मुख्यातिथिः केन्द्रीयशिक्षाराज्यमन्त्री,भारतसर्वकारः डॉ. सुकान्तमजूमदारः, मुख्यवक्ता च अ.भा. संघटनमन्त्री, संस्कृतभारती, दिनेशकामतः अस्ति। कार्यक्रमे अध्यक्षतां अखिलभारतीयः उपाध्यक्षः, संस्कृतभारती प्रो. श्रीनिवासवरखेड़ीवर्यः कुरुते। एतेषां लोकनायकानां संस्कृतानुरागः सर्वथा अभिनन्दनीयः अस्तीति आकाशवाण्याःसंस्कृतैकांशः स्वीकरोति।

पेरिस-ओलम्पिक -

पेरिस् ओलम्पिक इति क्रीडाकुम्भे भारतीयः मल्लयोद्धा अमनसेहरावतः अल्बानियादेशस्य जेलिम्खान् अबकारोवं पराजयित्या सप्तपंचाशत् किलोग्रामवर्गस्य फ्रीस्टाइल् इत्यस्य उपान्त्यचक्रीयक्रीडायां प्रवेशं कृतवान्। तस्य विजयेन भारतस्य मल्लयुद्धे पदकस्य आशा पुनः प्रज्वलिता, विशेषतः ह्यस्तनस्य विनेशफोगाटस्य हृदयविदारकप्रकरणानन्तरम्।

तदतिरिक्तं ओलम्पिकविजेता नीरजचोपड़ा कुन्तलक्षेपणस्य अन्तिमचक्रे स्वस्य उपाधिं रक्षितुं लक्ष्यं करिष्यति। भारतीयहॉकीदलम् च स्पेनदेशं विरुध्य कांस्यपदकाय क्रीडिष्यति।

लोकसभा/ सूक्ष्म, लघु अथ मध्यमोद्यम

केन्द्रसर्वकारेण अद्य उक्तं यत् विंशतिकोटिः वृत्यवसराःउद्यम पोर्टल, पीएम विश्वकर्मा योजना तथा च एमएसएमई इति क्षेत्रान्तर्गतैः विभिन्नोपक्रमैः निर्मीयन्ते। लोकसभायां प्रश्नकाले पूरकप्रश्नस्योत्तरं ददन् सूक्ष्म, लघु अथ मध्यमोद्यम मंत्रीजीतनराममांझी उक्तवान् यत् केवलं मन्त्रालयस्य उद्यम पोर्टल् इत्यत्र एव दशमलवाष्टाधिक- चतुष्कोटिजनाः पञ्जीकृताः सन्तीति।

।। इति वार्ताः।।